आरोह उत्कर्षः। अवरोहोऽपकर्षस्तयोः क्रमो वैरस्यावहो विन्यासः। यथा "प्रच्छन्नजेत्यादि"। अत्र पादत्रये क्रमेण बन्धस्य गाढ़ता। चतुर्थपादे त्वपकर्षः"।

**समाघ्रात** त्रि० सम्+आ+घ्रा—क्त। १सम्यग्गन्धिते २सम्यक्शिङ्घिते च।

**समान** त्रि० सममानयति अन—अण्। १तुल्ये २साधौ ३एकस्मिन्नित्यर्थे "समानतन्त्रसिद्धः" गौत० "यत्समानाधिकरणे"ति चिन्तामणिः। सम्+अन-णिच्। भुक्तान्नादेः समीकरणे नाभिदेशस्थे प्राणादिपञ्चकान्तर्गते ४वायुभेदे पु०

**समानविभक्तिक** त्रि० समानाविभक्तिर्यस्मात् कप्। स्वप्रकृतिविभक्तिसजातीयविभक्तिके पदे साजात्यञ्च प्रथमात्वादिना। तेन वेदाः प्रमाणमित्यादौ समानविभक्तिकत्वम्।

**समानविषयक** त्रि० समानो विषयो यस्य कप्। तुल्यरूपविशेष्यविशेषणताशालिनि ज्ञाने स च समाननिरूप्यनिरूपकभावापन्नविषयताशाली बोधः समानाकारकोऽप्यत्र।

**समानाधिकरण** त्रि० समानमेकमधिकरणं यस्य। एकाधि- १करणवृत्तिके स्वाधिकरणवृत्तिमति पदार्थे। २विभिन्नविभक्तिराहित्ये सति अभेदेनैकार्थबोधजनकत्वयुते पदे च "लटः शतृशानचावप्रथमासमानाधिकरणे" पा० लटोऽपि प्रथमासामाधिकरण्ये विभिन्नविभक्तिराहित्यादुबोध्यम्। "समानाधिकरणस्तत्पुरुषः कर्मधारयः" पा०।

**समानाशौच** न० कर्म०। अवच्छेदकालाभ्यां तुल्ये अशौचे यथा सपिण्डजननाशौचतुल्यं सपिण्डान्तरजननाशौचम् एवं त्रिरात्राद्यूर्ध्ववर्जितसपिण्डमरणाशौचतुल्यं तथाविधसपिण्डान्तरमरणाशौचं, जननमरणाशौचयोर्न तुल्यता नापि स्नानापनेयाङ्गाश्वूर्ध्वत्वयुक्तपुत्रजननाशौचेन सपिण्डजननाशौचस्य तुल्यता न वा यावदशौचाचारत्वयाशाश्रितायुक्तमहागुरुमरणाशौचस्य सपिण्डमरणाशौचस्य तुल्यता।

**समानोदक** पु० समानमेकं तर्पणादौ देयमुदकं यस्य। "समानोदकभावस्तु निवर्त्तेता चतुर्दशात्" इत्युक्ते एकादशावधिचतुर्दशपुरुषपर्य्यन्ते ज्ञातिभेदे सपिण्डशब्दे दृश्यम्।

**समानोदर्य्य** पु० समाने उदरे भवः यत् वा न आदेशः। १एकोदरजभ्रात्रादौ २भगिन्यां स्त्री अमरः। [त्रि०कौ०]

**समाप** पु० सम्यक् आपोऽत्र अच् समा० नि०। देवयजनस्थाने

**समापन** न० सम्+आप-ल्युट्। १समाप्तौ चरमकालसम्बन्धे २परिच्छेदे ३वधे च मेदि० ४समाधाने त्रिका०। ५वक्षे धरणिः।

**समापन्न** त्रि० सम्+आ-पद-क्त। १समाप्ते २प्राप्ते ३क्लिष्टे ४वधे च विश्वः। भावे क्त। ५समाप्तौ न०।

**समाप्त** त्रि० सम्+आप—क्त। १अवसानप्राप्ते २सम्यक्प्राप्ते च

**समाप्तपुनरात्तता** स्त्री समाप्ते वाक्यसमाप्तौ पुनरात्तता ग्रहणम्। क्रियान्वयेन निवृत्ताकाङ्क्षस्य विशेष्यवाचकपदस्य विशेषणान्तरार्थान्वयार्थं पुनरुच्चारणरूपे काव्यदोषभेदे दोषशब्दे ३७६४पृ० दृश्यम्।

**समाप्ताल** पु० समाप्लाय अलति पर्य्याप्नोति अल-अच्। पत्यौ संक्षिप्तसा०। [२प्राप्तौ शब्दच०।

**समाप्ति** स्त्री सम्+आप-क्तिन्। १अवसाने २समर्थने मेदि०।

**समायोग** पु० सम्+आ+युज—घञ्। १संयोगसमवायरूपादिसम्बन्धे "कर्णेऽपिसमायोगादिति" पुराणम्। २प्रयोजने मेदि०।

**समालम्बिन्** पु० समालम्बते सम्+आ+लबि-णिनि। भूतृणे राजनि०। २समालम्बनकर्त्तरि त्रि०।

**समालम्भ** पु० सम्+आ+लभ-घञ् मुम् च। कुङ्कुमादिना गात्रलेपने अमरः। ल्युट्। तत्रैवार्थे न०।

**समावर्त्तन** न० समावर्त्तते गुरुकुलादनेन सम्+आ+वृत-करणे ल्युट्। वेदाध्ययनानन्तरं गार्हस्थ्याय गुरुकुलादागमनहेतुके संस्कारभेदे तद्विधिः संस्कारतत्त्वे गोभिलोक्तो दृश्यः।

**समाविष्ट** त्रि० सम्+आ+विश-क्त। १युक्ते २मनोऽभिनिवेशयुते अभीष्टकर्त्तव्यकर्मणि चित्तैकाग्र्यविशेषयुक्ते च।

**समावृत्त** पु० सम्+आ+वृत-क्त। कृतसमावर्त्तनसंस्कारे "अतःपरं समावृत्तः कुर्य्याद्दारपरिग्रहम्" याज्ञ०।

**समावेश** पु० सम्+आ+विश-घञ्। १बहूनामर्थानामेकत्र वाक्यादौ व्यवस्थापने २कर्त्तव्येऽभिनिवेशे च।

**समावेशित** त्रि० सम्+आ+विश-णिच्—क्त। कृतसमावेशने

**समास** पु० सम्+अस-घञ्। १संक्षेपे २समर्थने मेदि०। ३समाहारे ४व्याकरणोक्ते सुबादिपदानामेकपदतासम्पादके पदसाधुतार्थके ५संस्कारभेदे च यथा "समर्थः पदविधिः" पा० "समर्थः संसृष्टार्थः सङ्गतार्थ इति यावत्। सामर्थ्यञ्च द्विविधम् व्यपेक्षावत्त्वमेकार्थीभावश्च। तत्र स्वार्थपर्य्यवसायिपदानामाकाङ्क्षादिवशात् यः परस्परं सम्बन्धः सा व्यपेक्षा। राज्ञः पुरुष इत्यादौ वाक्ये सत्यामाकाङ्क्षायां यो यो यस्मिन् सन्निहितो योग्यश्च स तेन तेन सम्बध्यते यथा राज्ञः पुरुषोऽश्वश्च राज्ञो देवदत्तस्य च पुरुषः ऋद्धस्य राज्ञोऽश्वो धनस्येत्यादि। वृत्तौ तु नैवम् इत्येवा०